श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचिता

# ॥ श्रीहयवदन कलाकलनमालिका ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

*The printed source of this stotra (Kadamba Mālā, pp. 253–256) contains numerous typographical errors. A best attempt has been made to correct them.*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहयवदन कलाकलनमालिका ॥

हयग्रीवकृपापात्रम् आत्रेयकुलभूषणम्।
सेवाख्यस्वामिनं सेवे बुधन्वपरदेशिकम्॥

सचित्रपूर्णेन्दुनिभं विचित्रं
सतां वसन्तं हृदये महान्तम्।
अजादियज्ञेशमजायमानं
मधुं भजे विष्णुमहं हयास्यम्॥ 1 ॥

विशाखयाधीतविभूतियुग्मः
सुरर्षभध्यातपदाब्जयुग्मः।
श्रुतो हि नाम्ना मधुसूदनो मां
रमाधवो रक्षतु वाजिवक्त्रः॥ 2 ॥

ज्येष्ठं वरिष्ठं मिथुनं मनोज्ञं
त्रिविक्रमं सत्त्वगुणावदातम्।
शुक्रस्य शुक्रं नयनापहन्तृ
ग्रीष्मापहं वाजिमुखं प्रपद्ये॥ 3 ॥

आषाढनूत्नाम्बुदभव्यदृश्यं
यद्वामनोऽभीष्टदमश्ववक्त्रम्।
ग्रीष्मार्दितः कर्कटकानुकारी
श्रये शुचि क्षेत्रमतीव भोग्यम्॥ 4 ॥

श्रोणोद्भवं श्रीधरमच्छकान्ति
    प्रभुं नभोनायककोटितुल्यम्।
सिंहास्यमाभाति यथैव तत्त्वं
    हयाननं भूरिकृपाभिवर्षि॥ 5॥

नभस्यमेतज्जगतां नमस्यं
    भद्रस्य सङ्कल्पकमाशु भद्रम्।
यथैव कन्या वृणुतेऽनुरूपं
    भजे हृषीकेशमहं हयास्यम्॥ 6॥

यदाश्वयुक्शारदचन्द्रबिम्बं
    मनोज्ञमश्वास्यमिषे विशेषात्।
तुलाविहीनं मम पद्मनाभं
    सदा वदन् शर्म लभेय दिव्यम्॥ 7॥

हिंसाकरं वृश्चिकरूपमद्धा
    श्रुतिप्रदीपो मधुमाजघान।
स कार्तिकेयादिनुतस्सदोर्जो
    दामोदरो नः प्रददातु भद्रम्॥ 8॥

मृगाश्वशीर्षो वचसामभूमिः
    धनुर्विना दुष्टविनाशकारी।
हेमाभमन्तःकरणाभिरामं
    सहं भजे केशवमादिमूर्तिम्॥ 9॥

सहस्यया‌श्लिष्टमिदं रहस्यं
    पुष्टं प्रकृष्टं मकरेण साकम्।
नारायणं पुष्यतमं हयास्यं
    व्याख्यानमुद्रामहितं प्रपद्ये॥ 10॥

तपो महीयस्सुमहान्मखोऽयं
    यन्माधवाराधनमद्य लब्धम्।
कुम्भोऽम्भसा पूर्ण इवास्मि लोके
    माघं भजेयं हयशीर्ष दैवात्॥ **11**॥

तपस्यतो मे सुचिरं हयास्यो
    गोविन्दरूपः शुभमातनोतु।
नीरोद्धृतो मीन इवान्यथा स्याम्
    यत्फल्गुनायोत्तरमस्ति भद्रम्॥ **12**॥

अत्र्यन्ववायजनिना धनिना हरिसेवया।
मणिना गुणिना सान्द्रा कलिता मणिमालिका॥ **13**॥

॥ इति श्रीहयवदन कलाकलनमालिका समाप्ता॥